11. Hafta

# मूर्खस्योपकारो न कर्तव्यः

कश्चन मूर्खः कदाचित् ग्रामान्तरात् प्रतिनिवर्तमानो निजग्रामगामिनं पन्थानं व्यस्मरत्। अथ पन्थानं पृच्छन् स मूर्खो जनैः 'नदीतटे दृश्यमानस्य तरोरुपरि वर्त्मना गच्छ'- इत्यवाचि ॥

ततः स तरुमुपगम्य 'एतस्योपरि खलु मे पन्था जनैरुपदिष्टः' इति मत्वा तस्य तरोः पृष्ठमारोहत्। तस्य पृष्ठे सर्पतस्तस्य भारात् तरोः शाखा ननाम। स तां यत्नेनावलम्ब्य यावदतिष्ठत् तावत् कश्चिदाधोरणः गजोपरि स्थितः नद्या आरुह्य तेन पथा समाययौ ॥

तरुशाखावलम्बी मूर्खस्तं हस्त्यारोहं दृष्ट्वा सदैन्यमवोचत् -

‘महाभाग! मां गृहाण’- इति। तदाकर्ण्य हस्त्यारोहः करुणया तं तरोरवतारयितुं पाणिभ्यां तस्य पादावग्रहीत्। मूर्खस्तु तरुशाखां नामुञ्चत्। अत्रान्तरे गजो निर्गतः।

हस्त्यारोहः शाखाग्रलम्बिनस्तस्य पादयोर्ललम्बे॥

ततः स मूर्खः सम्भ्रान्तो हस्त्यारोहमभ्यधात् – ‘यदि जानासि तर्हि शीघ्रं किमपि गीतं पठ। गानं श्रुत्वा कोऽप्यागत्य आवामितोऽवतारयेत्’- इति।

एवं तेनोभः स हस्त्यारोहस्तथा मधुरमगायत् यथा स मूर्खः प्रहृष्टः रसेन करतालिकां दातुं प्रावर्तत। अथ तत्क्षणं सहस्त्यारोहः स मूर्खो नद्यां निपत्य विपेदे।